# Mahashodashi Varnaratnavali Stotram

# મહાષોડશીવર્ણરત્નાવલિસ્તોત્રમ્

## Document Information

Text title : mahAShoDashIvarNaratnAvalistotram

File name : mahA16ratna.itx

Category : devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : This is a hymn to devi, with the syllables of

Latest update : January 27, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# મહાષોડશીવર્ણરત્નાવલિસ્તોત્રમ્

હ્રીંકારાઙ્ગણદીપિકાં શ્રિતજનાનન્દપ્રદાં શ્રીમતીં
શ્રીનાથાદ્યમરાર્ચિતઙ્ઘ્રિકમલાં શ્રીસુન્દરીં ભાવયે ।
શ્રીમન્મઞ્જુલરત્નસાનુવિલસન્મધ્યસ્થકૂટાગ્રગ-
શ્રીમન્નાગરમધ્યલાસિસુમહચ્છ્રીચક્રબિન્દૌ સ્થિતામ્ ॥ ૧॥

હ્રીંકારામૃતસિન્ધુકૌસ્તુભમણિં હ્રીંકારમધ્યસ્થિતાં
હ્રીંકારોન્નતરત્નસૌધવલભીસંલાસિપારાવતીમ્ ।
હ્ર્ીંકારમરપાદપાગ્રવિહરત્સંહૃષ્ટકેકીં ભજે
હ્રીંકારામ્બુદચઞ્ચલાં હૃદિ ગતાં હ્રીંકારવર્ણાત્મિકામ્ ॥ ૨॥

ક્લીંકારામ્બુજપત્રભાસ્કરનિભાં ક્લીંકારચન્દ્રપ્રભાં
ક્લીંકારાગ્નિશિખાં ભજામિ સતતં ક્લીંકારપેટીમણિમ્ ।
ક્લીંકારોપવનાન્યપુષ્ટગૃહિણીં ક્લીંકારવેદ્યાત્મિકાં
ક્લીંકારાબ્જહરપ્રિયાં પરતરાં ક્લીંકારવર્ણાત્મિકામ્ ॥ ૩॥

ઐં ઐમિત્યનુચિન્તકાચ્છહૃદયામ્ભોજાટવીહંસિકાં
ઇશિત્વાદિવિભૂતિસંવૃતમહારત્નાસને સંસ્થિતા ।
ઐશ્વર્યાય ભવત્વખણ્ડવિભવા યામ્બા સદા મે ગૃહે
ચેશાદ્યર્ચિતપાદપઙ્કજયુગા ચૈશાઙ્કમઞ્ચસ્થિતા ॥ ૪॥

સૌન્દર્યદ્રુમમઞ્જરી ભગવતી સૌવર્ણવર્ણાવતા-
ન્માં સંસારમહાભયાદ્ દ્રુતતરં સૌવર્નકુમ્ભસ્તની ।
સૂર્યાબ્જારિકૃશાનુદૃક્ શશિકલોત્તંસા સદાનન્દદા
સૌભાગ્યં દિશતાદથ પ્રથિતમપ્યવ્યાહતં ભૂરિ મે ॥ ૫॥

ઓઙ્કારાર્થનિરૂપણૈકમનસા ચોંકારનાદાત્મના
શ્રીદેવ્યા મમ ચિત્તભિત્તિરધુના ચિત્રાયતે ચોજ્જ્વલા ।
ઓજોભિર્જગદેતદદ્ય વિપુલં યસ્યાસ્તયાબ્જપ્રભૈ-
રોતપ્રોતમભૂત્ કુસુમ્ભકુરુવિન્દાબ્જપ્રભાયાઃ સદા ॥ ૬॥

હ્રીંકારાગમમસ્તકં હૃદિ કદા ભાયાદ્ વપુસ્તે પરં
હ્રીંકારાબ્ધિસુધામયં હૃતજપાશોણં હિતપ્રાપકમ્ ।
હ્રીંકારાદ્રિગુહાહરીન્દ્રશિશુકં હ્રીંકારકન્દાઙ્કુરં
હ્રીંકારામ્બુજસૌરભં હૃતજગજ્જાલં જગન્નાયિકે ॥ ૭॥

હ્રીંકારાધ્વરદક્ષિણે જનનિ તે પાદાબ્જયુગ્મે સદા
ભક્તિં મે જનયાશુ દેવિ કૃપયા શ્રીદેવિ તારાયિતે ।
શ્રીમન્મઞ્જુલરત્નનિર્મિતમહામઞ્જીરભૂષોજ્જ્વલે
શ્રીશૃઙ્ગારરસાલયે શ્રિતજગત્સ્વાન્તાબ્જિનીહંસિકે ॥ ૮॥

કલ્યાણ વિતનોતુ કામમનિશં કામારિવામાઙ્ગગા
કસ્તૂરીઘનસારરૂષિતકુચાગ્રાલમ્બિમુક્તાલતા ।
કામાકર્ષણદિવ્યપાશસુભગા કાન્ત્યાર્કકોટિપ્રભા
કલ્યાણી કમલેક્ષણા કલિમલપ્રધ્વંસિની કામદા ॥ ૯॥

એતાવન્મમ દેવિ તે પદયુગે ભક્તિર્દૃઢા ભૂયસી
સ્યાન્નેત્રે ચ જપાપ્રસૂનરુચિરાયાસ્ત્વત્તનોર્વીક્ષણે ।
આનન્દાશ્રુપરિપ્લુતે વચનમપ્યમ્બ સ્તવે ગદ્ગદં
ચેતસ્ત્વન્મયમમ્બ પશ્યતુ જગત્ ત્વન્મૂર્તિભાસારુણમ્ ॥ ૧૦॥

ઈશાનાદિપદાઞ્ચિતે શિવમયે મઞ્ચે પરેશાઙ્કગા-
મીશિત્વાદ્યખિલાષ્ટભૂતિમનિશં દાત્રીં સ્વભક્તાય મે ।
ચાપં ચૈક્ષવમાશુગં સુમમયં ક્રોધાત્મકં ચાઙ્કુશં
પાશં રાગતનું પ્રણૌમિ દધતીં શ્રીમન્મહાસુન્દરીમ્ ॥ ૧૧॥

લક્ષ્મીં ચક્રનિવાસિનીં લલિતસંગીતપ્રિયાં લાકિનીં
લબ્ધૈશ્વર્યસમુન્નતિં લયકરીં લાસ્યપ્રિયામાશ્રયે ।
લઙ્કાનાયકવૈરિપૂજિતપદાં લાવણ્યવારાંનિધિં
લક્ષ્મીપૂજિતપાદપદ્મયુગલાં મોક્ષાખ્યલક્ષ્મ્યૈ સદા ॥ ૧૨॥

હ્રીંકારાર્ણસુધાં ચ હૃદ્યમમરૈરીડ્યં મહત્ તે વપુઃ
પ્રાલેયાંશુકલાવિલાસિમકુટં હ્રીંકારનાદાત્મકમ્ ।
યે ધ્યાયન્તિ હૃદમ્બુજે પ્રતિદિનં તેષામનઙ્ગજ્વર-
ક્લાન્તાઃ સ્યુર્વશમાગતાસ્ત્વનુકલં વધ્વઃ સુરાણાં પ્રિયાઃ ॥ ૧૩॥

હન્તાસ્થાં મિતવૈભવેષુ હરિમુખ્યેષ્વેવ મૂઢા જના

ભક્તિં પામરદૈવતેષુ વિવશાઃ કુર્વન્તિ મોહાદિહ ।
ત્યક્ત્વા ત્વાં પરદેવતાં હરિહરબ્રહ્માદિભિઃ સેવિતાં
સર્વૈશ્વર્યમહોદયાં ખરમિમે સંત્યજ્ય ધેનું શ્રિતાઃ ॥ ૧૪॥

સર્વજ્ઞત્વમવાપ્ય સંસદિ સતાં શાસ્ત્રેષુ પાણ્ડિત્યમ-
પ્યમ્બાયાઃ પદપદ્મસંસ્મૃતિવશાન્મૂકોઽપિ વાગ્મી ભવેત્ ।
યસ્યાસ્તચ્ચરણામ્બુજં હરિહરબ્રહ્માદિભિર્વન્દિતં
મૂઢાશ્ચિન્તયતાશુ વોઽપિ તરસા દદ્યાત્ કવિત્વં શ્રિયઃ ॥ ૧૫॥

કલ્યાણ્યમ્બ કદમ્બકાનનગૃહે કલ્પદ્રુમૈઃ કાઙ્ક્ષિતા-
દર્થાદર્થસમર્પણેઽધિકતરે કારુણ્યકલ્લોલિભિઃ ।
કર્ણાન્તાયતલોચનાઞ્ચલગતૈર્વીક્ષ્યાદ્ય મામાતુરં
રક્ષાસુ ત્રિપુરે પરાત્પરતરે શ્રીકામસંજીવિનિ ॥ ૧૬॥

હસ્ત્યુત્તુઙ્ગપૃથૂરુકુમ્ભકુચયોર્વિન્યસ્તહારેણ તા-
મારક્તાંશુકમાલ્યભૂષણવરૈરુદ્દીપ્યમાનામુમામ્ ।
હાહાહૂહુમુખસ્તુતામનુદિનં હૈયગવીનાન્તરા-
મમ્બામાદિમવાક્સ્તુતામહમલં ધ્યાયામ્યભીષ્ટાપ્તયે ॥ ૧૭॥

લબ્ધજ્ઞાનસુધાકરેણ મનસા લક્ષ્યીકૃતં તે વપુઃ
સદ્ભિઃ સંતતમમ્બુજાક્ષિ લલિતે લગ્નં ભવત્વાન્તરે ।
લાવણ્યોજ્જ્વલદિવ્યગાત્રિ વિમલે લાક્ષારસાલંકૃતં
શ્રીમત્પાદપયોજયુગ્મમધુના મન્મૂર્ધ્નિ નિક્ષિપ્યતામ્ ॥ ૧૮॥

હ્રીંકારાબ્ધિસુધે હ્રિયા વિરહિતે હ્રીંકારમન્ત્રાર્થદે
હ્રીંકારપ્રિયશારિકે મયિ કૃપાં હ્રીંકારનાદોદયે ।
હ્રીંકારમલદર્પણપ્રતિકૃતે હ્રીંકારવેદ્યે શિવે
દીને મય્યધુના કુરુષ્વ દયયા હ્રીંકારદીપપ્રભે ॥ ૧૯॥

સંપત્કર્મણિ દીક્ષિતાનિ સકલાપદ્ભઞ્જનાન્યમ્બ તે
મામેવાકલયન્તુ પઙ્કજદલાક્ષેમંકરાણ્યાદરાત્ ।
બ્રહ્માદીન્ પદપદ્મલગ્નમકુટાન્ હિત્વા કથંચિચ્છિવે
નેત્રાણ્યદ્ય કૃપાસુધારસઝરીસિક્તાનિ હે સુન્દરિ ॥ ૨૦॥

કલ્પાન્તે હૃતસર્વલોકજઠરસ્યાનન્દનાટ્યં મુદા
કર્તુર્યન્મણિકુણ્ડલીયુગલિકા દીપાયતે સંતતમ્ ।
બ્રહ્મોપેન્દ્રમુખામરે વિરમતિ બ્રહ્માણ્ડભાણ્ડે પરં

સા પાશાઙ્કુશપુષ્પસાયકધનુર્વિદ્યોતતાન્મે હૃદિ ॥ ૨૧॥

લક્ષ્યં કિંચ ભવેન્મહાત્રિપુરસુન્દર્યાગમાન્તૈર્નુતે
માં લક્ષ્યીકુરુ વીક્ષણાશુગતતેસ્ત્વામેવ સર્વાત્મના ।
ધ્યાત્વા ચેતસિ સંસ્થિતં જગદિદં ત્વદ્રૂપમાર્યે સદા
જ્ઞાત્વાનન્યહૃદા વિહાય ભજનં નશ્યત્સુ દેવેષ્વિહ ॥ ૨૨॥

હ્રીંકારસ્મરણેન દેવિ તરસા હ્રીમાન્ સુધીમાન્ ભવેત્
તે મૂકોઽપિ જડોઽપિ પદ્મજનુષા સાપત્નિકોઽભૂદ્ ભૃશમ્ ।
આશ્લિષ્યામ્બુધિકન્યકાં વિલસતિ શ્રીમન્ત્રરાજાક્ષરં
તન્મય્યાદિશ દેવદેવિ કૃપયા ધન્યોઽસ્મ્યહં તેન ચ ॥ ૨૩॥

સૌવર્ણોજ્જ્વલમણ્ડપે મરતકપ્રાકારભિત્તૌ બૃહ-
ન્નાનારત્નમયાસને શિવમયે શ્રીકામરાજાઙ્કુકે ।
તિષ્ઠન્તીં કુરુવિન્દવૃન્દરુચિરાં માણિક્યભૂષોજ્જ્વલાં
ધન્યાસ્તે ભુવિ ચિન્તયન્તિ મનસા યે શ્રીમહાસુન્દરીમ્ ॥ ૨૪॥

ઐંકારામ્બુજકર્ણિકોજ્જ્વલમહદ્રત્નાસને સંસ્થિતાં
સિઞ્ચન્તીમમૃતદ્રવૈઃ શશિશિલાસ્પષ્ટાભિરામપ્રભામ્ ।
તેજોભિર્જગદમ્બ યે ભુવિ ભજન્ત્યાપીનતુઙ્ગસ્તનીં
તેષામાનનપઙ્કુજે નિવસતે વાણી સુધાસ્યન્દિની ॥ ૨૫॥

ક્લીમિત્યક્ષરમેકમેવ મનસા ધ્યાયન્તિ યે માનવાઃ
કંદર્પાયુતતુલ્યસુન્દરતરશ્રીમૂર્તયઃ શૈથિલમ્ ।
કુર્વન્તિ સ્મ રતેશ્ચ નૈજવપુષા તે પાતિવ્રત્યં સહ
સ્પર્ધન્તે હૃતવાગ્રમાઃ કમલનાભાબ્જાસનાભ્યાં સદા ॥ ૨૬॥

હ્રીંકારીં હૃદયામ્બુજેઽહમધુના હ્રીંકારસૌધે શુભે
હ્રીંકારોન્નતરત્નમઞ્ચફલકે હ્રીંકારશોણામ્બુજે ।
હ્રીંકારાક્ષરમુચ્ચરદ્ભગવતીમારોપ્ય શોણપ્રભાં
હ્રીંકારામ્બુજવારિગન્ધફલતામ્બૂલાદિભિસ્તોષયે ॥ ૨૭॥

હ્રીંકારામૃતપાદમઞ્જુલમણીવેદ્યન્તરે ભાસુરાં
શ્રીદેવીં શ્રિતસર્વલોકસકલાભીષ્ટપ્રદાનોત્સુકામ્ ।
શ્રીશ્રીમત્તનુમુગ્ધદર્કકિરણાં શ્રીશાંભવીં શ્રીકરી-
માત્મન્યૈક્યમુપાસ્મહે પરતરાં નિર્વાણસંસિદ્ધયે ॥ ૨૮॥

ઇતિ શ્રીમહાષોડશીવર્ણરત્નાવલિસ્તોત્રં સમ્પૂર્ણમ્ ।

This is a hymn to devi, with the syllables of the sacred Shrividya mantra mahAShoDashI encoded into the verses.

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

---

*Mahashodashi Varnaratnavali Stotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*